## पुष्पमाला

द्याम्मा लेखीरन्तरिक्षम्मा हिꣳसीः पृथिव्व्या सम्भव। अयꣳ हि त्त्वा स्वधितिस्त्ते-
तिजानः प्प्रणिनाय महते सौभगाय। अतस्त्वन्देव व्वनस्प्पते शतवल्शो व्विरोह
सहस्रवल्शा व्वि व्वयꣳ रुहेम॥

५ । ४३

## दूर्वा

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्प्परि।
एवा नो दूर्व्वे प्प्रतनु सहस्रेण शतेन च॥

१३ । २०

## सौभाग्यद्रव्याणि

अहिरिव भोगैः पर्य्येति बाहुञ्ज्याया हेतिम्परिबाधमानः।
हस्तघ्घ्नो व्विश्श्वा व्वयुनानि व्विद्द्वान्पुमान्पुमांꣳसम्परिपातु व्विश्श्वतः॥

२९ । ५१

सिन्धोरिव प्प्राद्ध्वने शूघनासो व्वातप्प्रमियः पतयन्ति यह्वाः।
घृतस्य धाराऽअरुषो न व्वाजी काष्ट्ठा भिन्दन्नूर्म्मिभिः पिन्न्वमानः॥

१७ ।९५

नाभिर्म्मे चित्तँव्विज्ञानम्पायुर्म्मेपचितिर्ब्भसत्।
आनन्दनन्दावाण्डौ मे भगः सौभाग्ग्यम्पसः।
जङ्घाब्भ्याम्पद्भ्यान्धर्म्मोस्स्मि व्विशि राजा प्प्रतिष्ट्ठितः॥

२० । ९

कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः। अभि त्त्वा रुद्द्रा व्वसवो
गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्श्विनाद्ध्वर्य्यू सादयतामिह त्त्वा॥

१४ । २

सुसन्दृशन्त्त्वा व्वयम्मघवन्व्वन्दिषीमहि। प्र नूनम्पूर्ण्णवन्धुर स्तुतो यासि व्वशाँ॥ऽअनु
योजा न्न्विन्द्र ते हरी॥

३ । ५२

## धूपः

ब्राह्मणोस्य मुखमासीद्बाहू राजन्न्यः कृतः।
ऊरू तदस्य यद्वैश्श्यः पद्भ्याꣳ शूद्द्रोऽअजायत॥

३१ । ११

धूरसि धूर्व्व धूर्व्वन्तन्धूर्व्व तँय्योस्म्मान्धूर्व्वति तन्धूर्व्व यँव्वयन्धूर्व्वामः।
देवानामसि व्वह्नितमꣳ सस्स्नितमम्पप्प्रितमञ्जुष्टतमन्देवहूतमम्॥

१ । ८

अश्श्वस्य त्त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः । मखाय त्त्वा मखस्य
त्त्वा शीर्ष्ण्णे । अश्श्वस्य त्त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः । मखाय
त्त्वा मखस्य त्त्वा शीर्ष्ण्णे । अश्श्वस्य त्त्वा वृष्ण्णः शक्क्ना धूपयामि देवयजने पृथिव्याः ।
मखाय त्त्वा मखस्य त्त्वा शीर्ष्ण्णे । मखाय त्त्वा मखस्य त्त्वा शीर्ष्ण्णे । मखाय त्त्वा
मखस्य त्त्वा शीर्ष्ण्णे । मखाय त्त्वा मखस्य त्त्वा शीर्ष्ण्णे ॥ ३७ । ९

वसवस्त्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्द्रास्त्त्वा धूपयन्तु त्रैष्टुभेन च्छन्द-
साङ्गिरस्वदादित्त्यास्त्त्वा धूपयन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्श्वे त्त्वा देवा
वैश्श्वानरा धूपयन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वदिन्द्द्रस्त्त्वा धूपयतु वरुणस्त्त्वा धूपयतु
विष्ण्णुस्त्त्वा धूपयतु ॥ ११ । ६०

## दीपः

चन्द्द्रमा मनसो जातश्श्चक्क्षोः सूर्य्योऽअजायत ।
श्श्रोत्राद्वायुश्च प्प्राणश्च मुखादग्निरजायत ॥ ३१ । १२

चन्द्द्रमाऽअप्प्स्वन्तरा सुपर्ण्णो धावते दिवि ।
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्क्रदत् ॥ ३३ । ९०

शुक्क्रज्योतिश्च चित्त्रज्योतिश्च सत्त्यज्योतिश्च ज्योतिष्म्माँश्च ।
शुक्क्रश्चऽऋतपाश्चात्त्यꣳहाः ॥ १७ । ८०

प्प्रथमा वाꣳ सरथिना सुवर्ण्णा देवौ पश्श्यन्तौ भुवनानि विश्श्वा ।
अपिप्प्रयञ्चोदना वाम्मिमाना होतारा ज्योतिः प्प्रदिशा दिशन्ता ॥ २९ । ७

पृथिव्याऽअहमुदन्तरिक्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्त्स्वर्ज्योतिरगामहम् ॥ १७ । ६७

## नैवेद्यम्

नाब्भ्याऽआसीदन्तरिक्क्षꣳ शीर्ष्ण्णो द्यौः समवर्त्तत ।
पद्भ्याम्भूमिर्द्दिशः श्श्रोत्रात्तथा लोकाँ२ऽअकल्प्पयन् ॥ ३१ । १३

अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्म्मिणः ।
प्प्र प्प्र दातारन्तारिषऽऊर्ज्जन्नो धेहि द्द्विपदे चतुष्प्पदे ॥ ११ । ८३

अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्श्रवाऽअच्छा नक्षि द्युमत्तमꣳ रयिन्दाः ॥ ३ । २५

अश्म्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्प्पतयश्च
मे हिरण्यञ्च मेऽयश्च मे श्श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे यज्ञेन
कल्प्पन्ताम् ॥ १८ । १३

### नीराजनम्

आ रात्रि पार्थिवꣳ रजः पितुरप्प्रायि धामभिः ।
दिवः सदाꣳसि बृहती वितिष्ठसऽआ त्वेषँवर्त्तते तमः ॥ ३४ । ३२

अग्निर्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या
देवता मरुतो देवता विश्श्वेदेवा देवता बृहस्प्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ १४ । २०

इदꣳ हविः प्प्रजननम्मेऽअस्तु दशवीरꣳ सर्व्वगणꣳ स्वस्तये ।
आत्त्मसनि प्प्रजासनि पशुसनि लोकसन्न्यभयसनि ।
अग्निः प्प्रजाम्बहुलाम्मे करोत्त्वन्नम्पयो रेतोऽअस्म्मासु धत्त ॥ १९ । ४८

ये देवासो दिव्व्येकादश स्त्थ पृथिव्व्यामद्ध्येकादश स्त्थ । अप्प्सुक्षितो महिनैकादश
स्त्थ ते देवासो यज्ज्ञमिमञ्जुषद्ध्वम् ॥ ७ । १९

### प्रदक्षिणा

सप्प्तास्यासन्प्परिधयस्त्रिः सप्प्त समिधः कृताः ।
देवा यद्यज्ज्ञन्तन्न्वानाऽअबद्ध्नन्पुरुषम्पशुम् ॥ ३१ । १५

परीत्य भूतानि परीत्य लोकान्प्परीत्त्य सर्व्वाः प्प्रदिशो दिशश्च ।
उपस्त्थाय प्प्रथमजामृतस्स्यात्त्मनात्त्मानमभिसँविवेश ॥ ३२ । ११

प्रतिपदसि प्प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥ ५ । ८

### मंत्रपुष्पाञ्जलिः

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो
गृत्त्सेभ्यो गृत्त्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्श्वरूपेभ्यश्च वो नमः ॥ १६ । २५

**रोग:**

शिरो मे श्रीर्य्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्प्राणोऽअमृतँ सम्म्राट्चक्षुर्विराट्श्रोत्रम् ॥ २०।५

**अहि:**

नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥ १३।६

**मुख्य:**

इषे त्त्वोर्ज्जे त्त्वा व्वायव स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽआप्प्या-
यद्ध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघशँसो
द्ध्रुवाऽअस्म्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥ १।१

**भल्लाट:**

घृताच्च्यसि जुहूर्न्नाम्म्ना सेदम्प्रियेण धाम्म्ना प्प्रियँ सदऽआसीद घृताच्च्यस्युपभृ-
न्नाम्म्ना सेदम्प्रियेण धाम्म्ना प्प्रियँ सदऽआसीद घृताच्च्यसि द्ध्रुवा नाम्म्ना सेदम्प्रियेण
धाम्म्ना प्प्रियँ सदऽआसीद प्प्रियेण धाम्म्ना प्प्रियँ सदऽआसीद । द्ध्रुवाऽअसद-
न्नृतस्य योनौ ता व्विष्ण्णो पाहि पाहि यज्ञम्पाहि यज्ञपतिम्पाहि माँय्यज्ञ-
न्यम् ॥ २।६

**सोम:**

व्वयँ सोम व्व्रते तव मनस्त्तनूषु बिब्भ्रतः । प्प्रजावन्तः सचेमहि ॥ ३।५६

**सर्प:**

व्विष्ण्णोर्न्नुकँव्वीर्य्याणि प्प्रवोचँय्यः पार्त्थिवानि व्विममे रजाँसि ।
योऽअस्कभायदुत्तरँ सधस्त्थँव्विचक्रमाणस्त्रेधोरुगायो व्विष्ण्णवे त्त्वा ॥ ५।१८

**अदिति:**

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः ।
व्विश्श्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ २५।२३

**ललजिह्वा**

मित्रस्य चर्षणीधृतोवो देवस्य सानसि । द्युम्नञ्चित्रश्श्रवस्तमम् ॥ ११।६२

**श्वदंष्ट्रा**

अग्ने ब्रह्म गृब्भ्णीष्व धरुणमस्यन्तरिक्क्षन्दृꣳह ब्रह्मवनि त्वा क्क्षत्रवनि
सजातवन्न्युपदधामि ब्भ्रातृव्यस्य वधाय । धर्त्रमसि दिवन्दृꣳह ब्रह्मवनि त्वा
क्क्षत्रवनि सजातवन्न्युपदधामि ब्भ्रातृव्यस्य वधाय । विश्श्वाब्भ्युस्त्वाशाब्भ्युऽउप-
दधामि चित स्त्थोर्द्ध्वचितो भृगूणामङ्गिरसान्तपसा तप्प्यद्ध्वम् ॥ १।१८

**वानरानना**

भग प्प्रणेतर्ब्भग सत्त्यराधो भगेमान्धियमुदवा ददन्नः ।
भग प्प्र नो जनय गोभिरश्श्वैर्ब्भग प्प्र नृभिर्न्नृवन्तः स्याम ॥ ३४।३६

**रुक्षाक्षी**

सुपर्ण्णोसि गरुत्त्मान्पृष्ट्ठे पृथिव्याः सीद ।
भासान्तरिक्क्षमापृण ज्ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृꣳह ॥ १७।७२

**केकराक्षी**

उदीरतामवरऽउत्त्परासऽउन्मद्ध्यमाः पितरः सोम्म्यासः ।
असुँय्यऽईयुरवृकाऽऋतज्ज्ञास्ते नोवन्तु पितरो हवेषु ॥ १९।४९

**बृहत्तुण्डा**

वरुणस्योत्तम्भनमसि वरुणस्य स्क्कम्भसर्ज्जनी स्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥ ४।३६

**सुराप्रिया**

वरुणः प्प्राविता भुवन्मित्त्रो विश्श्वाभिरूतिभिः । करतान्नः सुराधसः ॥ ३३।४६

**कपालहस्ता**

हꣳसः शुचिषद्वसुरन्तरिक्क्षसद्धोता वेदिषदतिथिर्द्दुरोणसत् । नृषद्वरसदृतसद्व्व्योम-
सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ १०।२४

# क्षेत्रपालमण्डलदेवतास्थापनम्

**क्षेत्रपालः**

नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥ १३।६

**अजरः**

पावकया यश्चितयन्त्या कृपा क्षामन्रुरुचऽउषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रणऽआ यो घृणे न ततृषाणोऽअजरः ॥ १७।१०

**व्यापकः**

प्रथमा वाᳪ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयञ्चोदना वाम्मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ २९।७

**इन्द्रचौरः**

इन्द्रस्य वज्रो मरुतामनीकम्मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्रति हव्या गृभाय ॥ २९।५४

**इन्द्रमूर्तिः**

एवेदिन्द्रँवृषणँवज्रबाहुँवसिष्ठासोऽअभ्यर्च्चन्त्यर्क्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयम्पात स्वस्तिभिः सदा नः ॥ २०।५४

**उक्षः**

उक्षा समुद्रोऽअरुणः सुपर्णः पूर्वस्य योनिम्पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥ १७।६०

**कुष्माण्डः**

यद्देवा देवहेडनन्देवासश्चकृमा वयम् ।
अग्निर्म्मा तस्मादेनसो विश्वान्मुञ्चत्वᳬहसः ॥ २०।१४

**वरुणः**

इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २१।१

कण्ठ:

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽउपश्रिताः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ १५।५६

नीलग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ॥ १६।५७

नाभि:

नाभिर्म्मे चित्तँविज्ज्ञानम्पायुर्म्मेपचितिर्ब्भसत् ।
आनन्दनन्दावाण्डौ मे भगः सौभाग्ग्यम्पसः ।
जङ्घाभ्याम्पद्भ्यान्धर्म्मोस्मि विशि राजा प्प्रतिष्ठितः ॥ २०।९

वास्तोष्पति:

**वास्तोष्पते प्रतिजानिह्यस्मान्त्स्वावेशोऽअनमीवो भवानः ।**
**षत्वेमहे प्रतितन्नो जुषस्वशन्नो भव द्विपदे शं चतुष्पदे ॥**

## अग्निस्थापनम्

अग्न्यावाहनम्

एषो ह देवः प्प्रदिशोनु सर्वाः पूर्वो ह जातः सऽउ गर्ब्भेऽअन्तः ।
सऽएव जातः स जनिष्ष्यमाणः प्प्रत्यङ्ङ्जनास्तिष्ठति सर्वतोमुखः ॥ ३२।८

भ्रामणम्

अग्निन्दूतम्पुरो दधे हव्यवाहमुपब्ब्रुवे । देवाँ२ऽआसादयादिह ॥ २२।१७

ध्यानम्

चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्याँ२ऽआविवेश ॥ १७।९१

अग्ने नय सुपथा रायेऽअस्म्मान्विश्वानि देव वयुनानि विद्वान् । युयोद्ध्यस्म्म-
ज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥ ५।३६

